ब्राह्मणहस्ते पवित्रदानम्। पात्रपुष्पेण शिरसः करपादार्च्चनं हस्तेऽन्यजलदानं हस्ताभ्यां पात्रमुत्थाप्य ॐ या दिव्येति च पठित्वा अमुकगोत्र मत्पितरमुक प्रेत एष ते अर्घ्यो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति पितृब्राह्मणहस्ते स्तोकमर्घ्योदकं पितृतीर्थेन दत्त्वा पितामहब्राह्मणहस्ते पवित्रदानं पात्रपुष्पेण शिरःकरपादार्च्चनं हस्ते ऽन्यजलदानम्। हस्ताभ्यां पात्रमुत्थाप्य या दिव्येति पठित्वा अमुकगोत्र मत्पितामह अमुकदेवशर्म्मन् सपत्नीक एष तेऽर्घ्यः स्वधा। पितृपात्रेणैव पितामहब्राह्मणहस्ते स्तोकमर्घ्योदकं दत्त्वाशेषमुदकं पिण्डसेचनार्थं पात्रान्तरे निधाय तेनैव पात्रेण पितामहब्राह्मणानां हस्तस्थं उदकं पवित्रञ्च गृहीत्वा पितृब्राह्मणवामपार्श्वे-दक्षिणाग्रकुशोपरि पितृभ्यः स्थानमसीति अधोमुखपात्रस्थापनम्। पितामहानां गन्धादिदानं अग्नौकरणम्। देवानां अवशिष्टान्नं पितामहादिपात्रे क्षिपेत्। पितामहादिपात्राभिमन्त्रणादिवाचनपर्य्यन्तं क्रमेण समाप्य पितृब्राह्मणपात्राभिमन्त्रणं अङ्गुष्ठनिवेशनं तिलविकिरणम्। सिद्धान्नविकिरणं कृत्वा अमुकगोत्र मत्पितरमुक प्रेत एतत्ते अन्नं सघृतं सपानीयं सव्यञ्जनं प्रतिषिद्धवर्जितं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। ततो देवप्रभृति आपोशानं दद्यात्। अतिथौ प्राप्ते अतिथिश्राद्धं कुर्य्यात् अस्मिन्नवसरे। तता विकिरणम्। पितामहादौ प्रश्नं कृत्वा पितृब्राह्मण ॐ स्वदितं भवद्भिरिति प्रश्नः अमुकगोत्र मत्पितामह अमुकशर्म्मन् सपत्नीक एष ते पिण्डो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। एवमन्ययोः। पिण्डदानमच्छिद्रमस्तु। सङ्कल्पसिद्धिरस्तु इति वाचनं कृत्वा ततः पितृप्रेतपिण्डपातनं ॐ संकल्पसिद्धिरस्त्विति वाचनम्। तं समाप्य पिण्डं त्रिधा कृत्वा ये समानाः समनसः इति मन्त्रद्वयं पठित्वा पितामहप्रपितामहवृद्धप्रपितामहपिण्डेषु क्षिपेत्। पिण्डेषु गन्धादिकं पिण्डचालनम्। अतिथिब्राह्मणे स्वदितमित्यादि प्रश्नः। ब्राह्मणानामाचमन भुक्तक्रमेण ताम्बूलदानं सुसम्प्रोक्षितमस्तु शिवा आपः सन्तु वृद्धप्रपितामहादिक्रमेण ब्राह्मणानां हस्ते जलदानम्। गोत्रस्याक्षय्यमस्तु पितृब्राह्मणहस्ते ॐ उपतिष्ठतामिति सतिलजलदानं नामगोत्रेण उपतिष्ठतामिति तेनोक्ते अघोराः पितरः सन्तु सन्त्विति उक्ते स्वधां वाचयिष्ये इति पितामहादिब्राह्मणानुज्ञापनम् ॐ वाच्यतामित्युक्ते पितामहादिभ्यः स्वधोच्यताम् अस्तु स्वधा इत्युक्ते पितृब्राह्मणे पितृभ्यः स्वधोच्यतां इति अस्तु स्वधा इत्युक्ते ॐ ऊर्ज्जं वहन्तीरमृतं इति दक्षिणाभिमुखवारिधारात्यागः। ॐ विश्वे देवा अस्मिन् यज्ञे प्रीयन्तामिति देवब्राह्मणहस्ते यवोदकदानम्। ॐ देवताभ्य इति त्रिर्ज्जपः। पिण्डान् पात्रे तोलयित्वा आचम्य पितामहादिभ्यो दक्षिणां दत्त्वा ततः पितृब्राह्मणाय ततो अतिथिब्राह्मणाय च। आशिषो मे दीयन्तामित्याशीःप्रार्थनं आशिषः प्रतिगृह्यन्तां इत्युक्ते दातारो नोऽभिवर्द्धन्तामिति पात्रमुत्तानं कृत्वा वाजे वाजे इति विसर्ज्जनम्। अभिरम्यतामिति पितृब्राह्मणविसर्जनम्।

सपिण्डीकरणश्राद्धं व्यासप्रोक्तं मया तव।
श्राद्धं विष्णुः श्राद्धकर्त्ता फलं श्राद्धादिकं हरिः॥”
इति गारुड़े २२४ अध्यायः॥*॥

तिथ्यादिविशेषे श्राद्धकरणफलं यथा,—

व्यास उवाच।

“अथ श्राद्धममावास्यां प्राप्य कार्य्यं द्विजोत्तमैः।
पिण्डान्वाहार्य्यकं भक्तभुक्तिमुक्तिफलप्रदम्॥
पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते।
अपराह्णे द्विजातीनां प्रशस्ते नामिषेण तु॥
प्रतिपत्प्रभृति ह्येतास्तिथयः कृष्णपक्षके।
चतुर्द्दशीं वर्ज्जयित्वा प्रशस्ता ह्युत्तरोत्तराः॥
अमावास्याष्टकास्तिस्रः पौषमाघादिषु त्रिषु।
तिस्रश्चान्वष्टकाः पुण्या माघस्य दशमी तथा॥
त्रयोदशी मघायुक्ता वर्षासु तु विशेषतः।
शस्यपाकश्राद्धकाला नित्यं प्रोक्ता दिने दिने॥
नैमित्तिकं हि कर्त्तव्यं ग्रहणे चन्द्रसूर्य्ययोः।
बान्धवानाञ्च मरणे नारकी स्यादथान्यथा॥
काम्यानि चैव श्राद्धानि शस्यन्ति ग्रहणादिषु।
अयने विषुवे चैव व्यतीपातेऽप्यनन्तकम्॥
संक्रान्त्यामक्षयं श्राद्धं तथा जन्मदिनेष्वपि।
नक्षत्रेषु च सर्व्वेषु तथा कामि विशेषतः॥
स्वर्गन्तु लभते कृत्वा कृत्तिकासु द्विजोत्तमः।
अपत्यमथ रोहिण्यां सौम्ये तु ब्रह्मवर्च्चसम्॥
मुद्राणां कर्म्मणां सिद्धिमार्द्रायां शस्यमेव च।
पुनर्व्वसौ तथा भूमिं श्रियं पुष्ये तथैव च॥
सर्व्वान् कामान् तथा सार्पे पैत्रे सौभाग्यमेव च
अर्य्यम्णे तु धनं विद्यात् फाल्गुन्यां पाप-
नाशनम्॥
ज्ञातिश्रेष्ठं तथा हस्ते चित्रायां सुबहून् सुतान्।
बाणिज्यसिद्धिं स्वातौ च विशाखायां सुवर्णकम्।
मैत्रे बहूनि मित्राणि राज्यं शक्रे तथैव च।
मूले कृषिं लभेद्यानं सिद्धिमाप्ये तथैव च॥
सर्व्वान् कामान् वैश्वदेवे श्रेष्ठन्तु श्रवणे पुनः।
श्रविष्ठायां तथा कामान् वारुणे च परं बलम्।
अजैकपादके कुर्य्याद्दाहिर्व्रध्ने गृहं शुभम्।
रेवत्यां बहवो गावा ह्यश्विन्यां तुरगांस्तथा॥
याम्ये चाजीवनं तस्मात् यदि श्राद्धं प्रयच्छति
आदित्यवारे चारोग्यं चान्द्रे सौभाग्यमेव च॥
कौजे सर्व्वत्र विजयं सर्व्वान् कामान् बुधस्य च
विद्यामभीष्टं जीवे तु धनं वै भार्गवे पुनः।
शनैश्चरे लभेदायुः प्रतिपत्सु शुभान् सुतान्।
कन्यकां वै द्वितीयायां तृतीयायां भुवस्तथा॥
पशून् क्षुद्रांश्चतुर्थ्यान्तु पञ्चम्यां शोभनान्
सुतान्।
षष्ठ्यां द्युतिं कृषिञ्चापि सप्तम्यां लभते नरः॥
अष्टम्यामपि बाणिज्यं लभते श्राद्धदः सदा।
स्यान्नवम्यामेकखुरं दशम्यां द्विखुरं बहु॥
एकादश्यान्तथा रूप्यं ब्रह्मवर्च्चस्विनः सुतान्
द्वादश्यां जातरूपन्तु रजतं रौप्यमेव च॥
ज्ञातिश्रेष्ठं त्रयोदश्यां चतुर्द्दश्यान्तु कुप्रजाः
पञ्चदश्यां सर्व्वकाममाप्नोति श्राद्धदः सदा॥
तस्माच्छ्राद्धं न कर्त्तव्यं चतुर्द्दश्यां द्विजातिभिः।
शस्त्रेण तु हतानां वै तत्र श्राद्धं प्रकल्पयेत्॥
द्रव्यब्राह्मणसम्पत्तौ न कालनियमः कृतः।
तस्माद्भोगापवर्गार्थं श्राद्धं कुर्य्यात् द्विजातिभिः॥
कर्म्मारम्भेषु सर्व्वेषु कुर्य्यादाभ्युदयं पुनः।
पुत्त्रजन्मादिषु श्राद्धं पार्व्वणं पर्व्वणि स्मृतम्॥
अहन्यहनि नित्यं स्यात् काम्यं नैमित्तिकं तथा
एकोद्दिष्टन्तु विज्ञेयं वृद्धिश्राद्धञ्च पार्व्वणम्॥
एतत् पञ्चविधं श्राद्धं मनुना परिकीर्त्तितम्।
यात्रायां षष्ठमाख्यातं तत् प्रयत्नेन पालयेत्॥
शुद्धये सप्तमं श्राद्धं ब्रह्मणा परिकीर्त्तितम्।
दैविकं चाष्टमं श्राद्धं यत् कृत्वा मुच्यते भयात्॥
सन्ध्यारात्र्योर्न कर्त्तव्यं राहोरन्यत्र दर्शनात्।
देशानाञ्च विशेषेण भवेत् पुण्यमनुत्तमम्॥
गयायामक्षयं श्राद्धं प्रयागेऽमरकण्टके।
गायन्ति पितरो गाथां कीर्त्तयन्ति मनीषिणः॥
एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत्।
यजेत् वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
एष्टव्या बहवः पुत्त्राः शीलवन्तो गुणान्विताः।
तेषान्तु समवेतानां यद्येकोऽपि गयां व्रजेत्॥
गयां प्राप्यानुषङ्गेण यः श्राद्धं सम्यगाचरेत्।
तारिताः पितरस्तेन स याति परमां गतिम्॥
वराहपर्व्वते चैव गङ्गायाञ्च विशेषतः।
वाराणस्यां विशेषेण यत्र देवः स्वयं हरः॥
गङ्गाद्वारे प्रभासे च विल्वके नीलपर्वते।
कुरुक्षेत्रे च कुब्जाम्रे भृगुतुङ्गे महालये॥
केदारे फल्गुतीर्थे च नैमिषारण्य एव च।
सरस्वत्यां विशेषेण पुष्करे च विशेषतः॥
नर्म्मदायां कुशावर्त्ते श्रीशैले भद्रकर्णके।
वेत्रवत्यां विपाशायां गोदावर्य्यां विशेषतः॥
एवमादिष्वथान्येषु तीर्थेषु पुलिनेषु च।
नदीनाञ्चैव तीरेषु तुष्यन्ति पितरः सदा॥*॥
व्रीहिभिश्च यवैर्म्माषैरद्भिर्म्मूलफलेन च।
श्यामकैश्च तथा शाकैर्नीवारैश्च प्रियङ्गुभिः॥
गोधूमैश्च तिलैर्म्मुद्गैर्म्मासं प्रीणयते पितॄन्।
आम्रानाम्रातकानिक्षून् मृद्वीकांश्च सदाड़ि-
मान्।
विदारींश्च भरण्डांश्च श्राद्धकाले प्रदापयेत्।
लाजान्माधुयुतान्दद्यात् शक्तून् शर्करया सह
दद्याच्छ्राद्धे प्रयत्नेन शृङ्गाटककशेरुकान्।
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेन तु पञ्च च॥
षण्मासान् छागमांसेन पार्षतेनाथ सप्त वै।
अष्टावेणस्य मांसेन रौरवेण नवैव तु॥
दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः।